# shrIdurgA ApaduddhArAShTakam

# શ્રીદુર્ગા આપદુદ્ધારાષ્ટકમ્ અથવા દુર્ગાપદુદ્ધારસ્તોત્રમ્

## Document Information

Text title : durgaa aapaduddhaaraaShTakam.h

File name : durga-a8.itx

Category : aShTaka, devii, durgA, devI

Location : doc_devii

Transliterated by : Kapila Shankaran Love kapilalove at gmail.com

Proofread by : Kapila Shankaran Love, Nat Natarajan, D.K.M. Kartha

Description-comments : siddheshvarItantre

Source : Brihatstotraratnakara 408

Latest update : September 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 27, 2022

*sanskritdocuments.org*

# shrIdurgA ApaduddhArAShTakam

# શ્રીદુર્ગા આપદુદ્ધારાષ્ટકમ્ અથવા દુર્ગાપદુદ્ધારસ્તોત્રમ્

દુર્ગાપદુદ્ધારસ્તવરાજઃ

નમસ્તે શરણ્યે શિવે સાનુકમ્પે નમસ્તે જગદ્વ્યાપિકે વિશ્વરૂપે ।
નમસ્તે જગદ્વન્દ્યપાદારવિન્દે નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૧॥
નમસ્તે જગચ્ચિન્ત્યમાનસ્વરૂપે નમસ્તે મહાયોગિવિજ્ઞાનરૂપે ।
નમસ્તે નમસ્તે સદાનન્દ રૂપે નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૨॥
અનાથસ્ય દીનસ્ય તૃષ્ણાતુરસ્ય ભયાર્તસ્ય ભીતસ્ય બદ્ધસ્ય જન્તોઃ ।
ત્વમેકા ગતિર્દેવિ નિસ્તારકર્ત્રી નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૩॥
અરણ્યે રણે દારુણે શુત્રુમધ્યે જલે સઙ્કટે રાજગેહે પ્રવાતે ।
ત્વમેકા ગતિર્દેવિ નિસ્તાર હેતુર્નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૪॥
અપારે મહાદુસ્તરેઽત્યન્તઘોરે વિપત્સાગરે મજ્જતાં દેહભાજામ્ ।
ત્વમેકા ગતિર્દેવિ નિસ્તારનૌકા નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૫॥
નમશ્ચણ્ડિકે ચણ્ડદોર્દણ્ડલીલાસમુત્ખણ્ડિતા ખણ્ડલાશેષશત્રોઃ ।
ત્વમેકા ગતિર્વિઘ્નસન્દોહહર્ત્રી નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૬॥
ત્વમેકા સદારાધિતા સત્યવાદિન્યનેકાખિલા ક્રોધના ક્રોધનિષ્ઠા ।
ઇડા પિઙ્ગલા ત્વં સુષુમ્ના ચ નાડી  નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૭॥
નમો દેવિ દુર્ગે શિવે ભીમનાદે સદાસર્વસિદ્ધિપ્રદાતૃસ્વરૂપે ।
વિભૂતિઃ સતાં કાલરાત્રિસ્વરૂપે નમસ્તે જગત્તારિણિ ત્રાહિ દુર્ગે ॥ ૮॥
શરણમસિ સુરાણાં સિદ્ધવિદ્યાધરાણાં
    મુનિમનુજપશૂનાં દસ્યુભિસ્ત્રાસિતાનામ્ ।
નૃપતિગૃહગતાનાં વ્યાધિભિઃ પીડિતાનાં
    ત્વમસિ શરણમેકા દેવિ દુર્ગે પ્રસીદ ॥ ૯॥
ઇદં સ્તોત્રં મયા પ્રોક્તમાપદુદ્ધારહેતુકમ્ ।
ત્રિસન્ધ્યમેકસન્ધ્યં વા પઠનાદ્ઘોરસઙ્કટાત્ ॥ ૧૦॥

મુચ્યતે નાત્ર સન્દેહો ભુવિ સ્વર્ગે રસાતલે ।
સર્વં વા શ્લોકમેકં વા યઃ પઠેદ્ભક્તિમાન્ સદા ॥ ૧૧॥

સ સર્વ દુષ્કૃતં ત્યક્ત્વા પ્રાપ્નોતિ પરમં પદમ્ ।
પઠનાદસ્ય દેવેશિ કિં ન સિદ્ધ્યતિ ભૂતલે ॥ ૧૨॥

સ્તવરાજમિદં દેવિ સઙ્ક્ષેપાત્કથિતં મયા ॥ ૧૩॥

ઇતિ શ્રીસિદ્ધેશ્વરીતન્ત્રે ઉમામહેશ્વરસંવાદે શ્રીદુર્ગાપદુદ્ધારસ્તોત્રમ્ ॥

var હરગૌરીસંવાદે આપદુદ્ધારાષ્ટકસ્તોત્રં

Encoded and Proofread by Kapila Sankaran, Nat Natarajan

---

*shrIdurgA ApaduddhArAShTakam*

pdf was typeset on September 27, 2022

Please send corrections to *sanskrit@cheerful.com*